# SUrya Gita

# સૂર્ય ગીતા

## Document Information

Text title : sUryagItA

File name : suuryagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : tattvasArAyaNakarmakANda

Latest update : October 12, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# સૂર્ય ગીતા

॥ શ્રી ગણેશાય નમઃ ॥

॥ અથ સૂર્યગીતા પ્રારભ્યતે ॥

બ્રહ્મા ઉવાચ -
પ્રપઞ્ચસૃષ્ટિકર્મેદં મમ શ્રીગુરુનાયક ।
અહાર્યં દ્વિપરાર્ધાન્તમાધિકારિકતાવશાત્ ॥ ૧ ॥

ઇતિ ત્વદ્વદનામ્ભોજાત્સમ્યગ્વિદિતવાનહમ્ ।
તથાપ્યત્ર ન મે ચિન્તા જાયતે ત્વત્કૃપાબલાત્ ॥ ૨ ॥

ત્વયિ પ્રસન્ને મય્યેવં બોધાનન્દઃ સ્વરૂપતઃ ।
પુનર્જન્મભયાભાવાદ્ધીર એવાસ્મિ વૃત્તિષુ ॥ ૩ ॥

તથાઽપિ કર્મભાગેષુ શ્રોતવ્યમવશિષ્યતે ।
તત્સર્વં ચ વિદિત્વૈવ સર્વજ્ઞઃ સ્યામહં પ્રભો ॥ ૪ ॥

જગજ્જીવેશ્વરાદીનાં પ્રાગુત્પત્તેર્નિરંજનમ્ ।
નિર્વિશેષમકર્મૈકં બ્રહ્મૈવાસીત્તદદ્વયમ્ ॥ ૫ ॥

તસ્ય જીવેશ સ્રષ્ટૃત્વં પ્રોચ્યતે વેદવાદિભિઃ ।
અકર્મણઃ કથં સૃષ્ટિકર્મકર્તૃત્વમુચ્યતે ॥ ૬ ॥

સકર્મા સેન્દ્રિયો લોકે દૃશ્યતે ન નિરિન્દ્રિયઃ ।
બ્રહ્મણોઽતીન્દ્રિયત્વં ચ સર્વશાસ્ત્રેષુ ઘુષ્યતે ॥ ૭ ॥

નશ્યમાનતયોત્પત્તિમત્વાદાદ્યસ્ય કર્મણઃ ।
ન મુખ્યમવકલ્પેતાપ્યનાદિત્વોપવર્ણનમ્ ॥ ૮ ॥

બ્રહ્મ ચેત્કર્મકુર્વીત યનેકેનાપિ હેતુના ।
તથા ચ સંસૃતિસ્તસ્ય પ્રસજ્યેત તુ નાત્મનઃ ॥ ૯ ॥

તસ્માદાદ્યસ્ય પુણ્યસ્ય પાપસ્ય ચ દયાનિધે ।

કર્મણો બ્રૂહિ મે સ્પષ્ટમુપપત્તિં ગુરૂત્તમ ॥ ૧૦ ॥

ઇત્યુક્તો વિધિના દેવો દક્ષિણામૂર્તિરીશ્વરઃ ।
વિચિત્રપ્રશ્નસન્તુષ્ટ ઇદં વચનમબ્રવીત્ ॥ ૧૧ ॥

શ્રીગુરુમૂર્તિરુવાચ -
બ્રહ્મન્સાધુરયં પ્રશ્નસ્તવ પ્રશ્નવિદાં વર ।
શ‍ૃણુષ્વ સાવધાનેન ચેતસાઽસ્યોત્તરં મમ ॥ ૧૨ ॥

પ્રાગુત્પત્તેરકર્મૈકમકર્તૃ ચ નિરિન્દ્રિયમ્ ।
નિર્વિશેષં પરં બ્રહ્મૈવાસીન્નાત્રાસ્તિ સંશયઃ ॥ ૧૩ ॥

તથાઽપિ તસ્ય ચિચ્છક્તિસંયુતત્વેન હેતુના ।
પ્રતિચ્છાયાત્મિકે શક્તી માયાવિદ્યે બભૂવતુઃ ॥ ૧૪ ॥

અદ્વિતીયમપિ બ્રહ્મ તયોર્યત્પ્રતિબિમ્બિતમ્ ।
તેન દ્વૈવિધ્યમાસાદ્ય જીવ ઈશ્વર ઇત્યપિ ॥ ૧૫ ॥

પુણ્યપાપાદિકર્તૃત્વં જગત્સૃષ્ટ્યાદિકર્તૃતામ્ ।
અભજત્સેન્દ્રિયત્વં ચ સકર્મત્વં વિશેષતઃ ॥ ૧૬ ॥

યઃ સ્વશક્ત્યા સમુલ્લાસ ઉદભૂત્પરમાત્મનઃ ।
સ્વબન્ધજનકં સૂક્ષ્મં તદાદ્યં કર્મ કથ્યતે ॥ ૧૭ ॥

ન તેન નિર્વિશેષત્વં હીયતે તસ્ય કિંચન ।
ન ચ સંસારબન્ધશ્ચ કશ્ચિદ્બ્રહ્મન્પ્રસજ્યતે ॥ ૧૮ ॥

પારમાર્થિકસંસારી જીવઃ પુણ્યાદિકર્મવાન્ ।
પ્રાતિભાસિકસંસારી ત્વીશઃ સૃષ્ટ્યાદિકર્મવાન્ ॥ ૧૯ ॥

અસંસારિ પરં બ્રહ્મ જીવેશોભયકારણમ્ ।
તતોઽપ્યતીતં નીરૂપં અવાઙ્મનસગોચરમ્ ॥ ૨૦ ॥

કર્મવન્તૌ પરિત્યજ્ય જીવેશૌ યે મહાધિયઃ ।
અકર્મવત્પરં બ્રહ્મ પ્રયાન્ત્યત્ર સમાધિભિઃ ॥ ૨૧ ॥

તે વિદેહવિમુક્તા વા જીવન્મુક્તા નરોત્તમાઃ ।
કર્માકર્મોભયાતીતાસ્તદ્બ્રહ્મારૂપમાપ્નુયુઃ ॥ ૨૨ ॥

કર્મણા સંસૃતૌ બદ્ધા મુચ્યન્તે તે હ્યકર્મણા ।
બન્ધમોક્ષોભયાતીતાઃ કર્મિણો નાપ્યકર્મિણઃ ॥ ૨૩ ॥

જીવસ્ય કર્મણા બન્ધસ્તસ્ય મોક્ષશ્ચ કર્મણા ।
તસ્માદ્ધેયં ચ કર્મ સ્યાદુપાદેયં ચ કર્મ હિ ॥ ૨૪ ॥

ત્યક્તે કર્મણિ જીવત્વમાત્મનો ગચ્છતિ સ્વયમ્ ।
ગૃહીતે કર્મણિ ક્ષિપ્રં બ્રહ્મત્વં ચ પ્રસિધ્યતિ ॥ ૨૫ ॥

આવિદ્યકમશુદ્ધં યત્કર્મ દુઃખાય તન્નૃણામ્ ।
વિદ્યાસમ્બન્ધિ શુદ્ધં યત્ તત્સુખાય ચ કથ્યતે ॥ ૨૬ ॥

વિદ્યાકર્મક્ષુરાત્તીક્ષ્ણાત્ છિનત્તિ પુરુષોત્તમઃ ।
અવિદ્યાકર્મપાશાંશ્ચેત્સ મુક્તો નાત્ર સંશયઃ ॥ ૨૭ ॥

સર્વસ્ય વ્યવહારસ્ય વિધે કર્મૈવ કારણમ્ ।
ઇતિ નિશ્ચયસિદ્ધ્યૈ તે સૂર્યગીતાં વદામ્યહમ્ ॥ ૨૮ ॥

કર્મસાક્ષિણમાદિત્યં સહસ્રકિરણં પ્રભુમ્ ।
સમ્પ્રાશ્ચં સર્વધર્મજ્ઞામપૃચ્છદરુણઃ પુરા ॥ ૨૯ ॥

અરુણ ઉવાચ -
ભગવન્ કેન સંસારે પ્રાણિનઃ સંભ્રમન્ત્યમી ।
કેનૈતેષાં નિવૃત્તિશ્ચ સંસારાદ્વદ સદ્ગુરો ॥ ૩૦ ॥

ઇતિ પૃષ્ટઃ સ સર્વજ્ઞઃ સહસ્રકિરણોજ્વલઃ ।
સૂર્યોઽબ્રવીદિદં શિષ્યમરુણં નિજસારથિમ્ ॥ ૩૧ ॥

સૂર્ય ઉવાચ -
અરુણ ત્વં ભવસ્યદ્ય મમ પ્રિયતમઃ ખલુ ।
યતઃ પૃચ્છસિ સંસારભ્રમકારણમાદરાત્ ॥ ૩૨ ॥

ભ્રમન્તિ કેવલં સર્વે સંસારે પ્રાણિનોઽનિશમ્ ।
ન તુ તત્કારણં કેનાપ્યહો કિંચિદ્વિચાર્યતે ॥ ૩૩ ।
તજ્જિજ્ઞાસુતયા ત્વં તુ શ્લાઘ્યોઽસિ વિબુધોત્તમૈઃ ।
શૃણુશ્ચારુણ વક્ષ્યામિ તવ સંસારકારણમ્ ॥ ૩૪ ॥

પુણ્યપાપાત્મકં કર્મ યત્સર્વપ્રાણિસંચિતમ્ ।
અનાદિસુખદુઃખાનાં જનકં ચાભિધીયતે ॥ ૩૫ ॥

શાસ્ત્રૈઃ સર્વૈશ્ચ વિહિતં પ્રતિષિદ્ધં ચ સાદરમ્ ।

કામાદિજનિતં તત્ત્વં વિદ્ધિ સંસારકારણમ્ ॥ ૩૬ ॥

પશ્વાદીનામભાવેઽપિ તયોર્વિધિનિષેધયોઃ ।
સંસારસ્ય ન લોપોઽસ્તિ પૂર્વકર્માનુસારતઃ ॥ ૩૭ ॥

પૂર્વં મનુષ્યભૂતાનાં પાપકર્માવશાદિહ ।
શ્વખરોષ્ટ્રાદિજન્માનિ નિકૃષ્ટાનિ ભવન્ત્યહો ॥ ૩૮ ॥

પાપકર્મસુ ભોગેન પ્રક્ષીણેષુ પુનશ્ચ તે ।
પ્રાપ્નુવન્તિ મનુષ્યત્વં પુનશ્ચ શ્વાદિજન્મિતામ્ ॥ ૩૯ ॥

જનનૈર્મરણૈરેવં પૌનઃપુન્યેન સંસૃતૌ ।
ભ્રમન્ત્યબ્ધિતરંગસ્થદારુવદ્ધીમતાં વર ॥ ૪૦ ॥

અરુણ ઉવાચ -
પ્રક્ષીણપાપકર્માણઃ પ્રાપ્તવન્તો મનુષ્યતામ્ ।
પુનશ્ચ શ્વાદિજન્માનિ કેન ગચ્છન્તિ હેતુના ॥ ૪૧ ॥

ન હિ દુર્જન્મહેતુત્વં પુણ્યાનાં યુક્તમીરિતુમ્ ।
ન ચ પુણ્યવતાં ભૂયઃ પાપકર્મોપપદ્યતે ॥ ૪૨ ॥

પુણ્યૈર્વિશુદ્ધચિત્તાનાં જ્ઞાનયોગાદિસાધનૈઃ ।
સંસારમોક્ષસંસિદ્ધ્યા પાપકર્માપ્રસક્તિતઃ ॥ ૪૩ ॥

જીવેષુ પૌનઃપુન્યં ચેદુત્તમાધમજન્મનામ્ ।
નિયમેનાભિધીયેત યેન કેનાપિ હેતુના ॥ ૪૪ ॥

મોક્ષશાસ્ત્રસ્ય વૈયર્થ્યમાપતત્યેવ સર્વથા ।
તસ્માદપાપિનાં જન્મ પુનશ્ચેતિ ન યુજ્યતે ॥ ૪૫ ॥

ઇત્યુક્તો ભગવાનાહ સર્વજ્ઞઃ કરુણાનિધિઃ ।
રવિઃ સંશયવિચ્છેદનિપુણોઽરુણમાદરાત્ ॥ ૪૬ ॥

રવિરુવાચ -
પ્રક્ષીણેષ્વપિ ભોગેન પાપકર્મસુ દેહિનઃ ।
પુનશ્ચ પાપકર્માણિ કુર્વન્તો યાન્તિ દુર્ગતિમ્ ॥ ૪૭ ॥

તાનિ દુર્જન્મબીજાનિ કામાત્પાપાનિ દેહિનામ્ ।
પુનરપ્યુપપદ્યન્તે પૂર્વપુણ્યવતામપિ ॥ ૪૮ ॥

સકામાનાં ચ પુણ્યાનાં ભોગહેતુતયા નૃણામ્ ।

ન ચિત્તશુદ્ધિહેતુત્વં ક્વચિદ્ભવિતુમર્હતિ ॥ ૪૯ ॥

કુતશ્ચાશુદ્ધચિત્તાનાં જ્ઞાનયોગાદિસંભવઃ ।
જ્ઞાનયોગાદિહીનાનાં કુતો મોક્ષશ્ચ સંસૃતેઃ ॥ ૫૦ ॥

કામેન હેતુના સત્સ્વપ્યુત્તમાધમજન્મસુ ।
મોક્ષશાસ્ત્રસ્ય સાર્થક્યં નૈષ્કામ્યોદયહેતુકમ્ ॥ ૫૧ ॥

સુખદુઃખોપભોગેન યદા નિર્વેદમાગતઃ ।
નિષ્કામત્વમવાપ્નોતિ સ્વવિવેકપુરસ્સરમ્ ॥ ૫૨ ॥

તતઃપ્રભૃતિ કૈશ્ચિત્સ્યાજ્જન્મભિર્જ્ઞાનયોગવાન્ ।
શ્રવણાદિપ્રયત્નૈર્હિ મુક્તિઃ સ્વાત્મન્યવસ્થિતિઃ ॥ ૫૩ ॥

કર્માધ્યક્ષં પરાત્માનં સર્વકર્મૈકસાક્ષિણમ્ ।
સર્વકર્મવિદૂરન્તં કર્મવાન્કથમાપ્નુયાત્ ॥ ૫૪ ॥

પુણ્યેષ્વપિ ચ પાપેષુ પૌર્વિકેષુ તુ ભોગતઃ ।
ક્ષપિતેષુ પરાત્મા સ સ્વયમાવિર્ભવિષ્યતિ ॥ ૫૫ ॥

કર્તૃભિર્ભુજ્યતે જીવૈઃ સર્વકર્મફલં ન તુ ।
સાક્ષિણા નિર્વિકલ્પેન નિર્લેપેન પરાત્મના ॥ ૫૬ ॥

જીવાનાં તદનન્યત્વત્ભોગસ્યાવસરઃ કુતઃ ।
ઇતિ કેચન શંકન્તે વેદાન્તાપાતદર્શિનઃ ॥ ૫૭ ॥

પરમાર્થદશાયાં હિ તદનન્યત્વમિષ્યતે ।
વ્યવહારદશાયાં નાનુપપત્તિશ્ચ કાચન ॥ ૫૮ ॥

પરમાર્થદશારૂઢે જીવન્મુક્તેઽપિ કર્મણામ્ ।
ભોગોઽઙ્ગીક્રિયતે સમ્યક્ દૃશ્યતે ચ તથા સતિ ॥ ૫૯ ॥

અજ્ઞાનાં વ્યવહારૈકનિષ્ઠાનાં તદનન્યતા ।
અભોક્તૃતા ચ કેનૈવ વક્તું શક્યા મનીષિણા ॥ ૬૦ ॥

જ્ઞાનિનઃ કર્મકર્તૃત્વં દૃશ્યમાનમપિ સ્ફુટમ્ ।
ઉત્પાદયેત્ફલં નેતિ મન્યન્તે સ્વપ્નકર્મવત્ ॥ ૬૧ ॥

તદયુક્તં ન હિ સ્વપ્ને પાપકર્તુઃ સ્વતન્ત્રતા ।
જાગ્રતિ પ્રાણિનઃ કર્મ સ્વાતન્ત્ર્યં વર્તતે ખલુ ॥ ૬૨ ॥

તિરશ્ચાં જાગરાવસ્થા યથા ભોગૈકકારણમ્ ।
તથા સ્વપ્નદશા નૃણાં ફલભોગૈકકારણમ્ ॥ ૬૩ ॥

નૃણાં ચ જાગરાવસ્થા બાલાનાં સ્યાત્તથા ન તુ ।
યૂનાં વૃદ્ધતમાનાં વા કિમુત સ્વાત્મવેદિનામ્ ॥ ૬૪ ॥

ભાવિભોગાર્થકં કર્મ જાગ્રત્યેવ નૃણાં ભવેત્ ।
ફલં તુ કર્મણઃ સ્વપ્ને જાગ્રત્યપિ ચ યુજ્યતે ॥ ૬૫ ॥

કર્મણ્યધ્યસ્ય ભોગં યે ભોગેઽધ્યસ્યાથ કર્મ ચ ।
કર્મ તદ્ભોગયોર્ભેદમજ્ઞાત્વાહુર્યથેપ્સિતમ્ ॥ ૬૬ ॥

તેષાં મન્દધિયાં જ્ઞાનવાદિનાં પાપકારિણામ્ ।
કથં કૃતાર્થતાં બ્રૂયામધ્યાસક્ષયસંભવામ્ ॥ ૬૭ ॥

કર્મણ્યકર્મધીર્યેષામકર્મણિ ચ કર્મધીઃ ।
તે ચાધ્યાસવશા મન્દા જ્ઞાનિનઃ સ્વૈરચારિણઃ ॥ ૬૮ ॥

વર્ણાશ્રમાદિધર્માણામદ્વૈતં કર્મણૈવ યે ।
અનુતિષ્ઠન્તિ તે મૂઢાઃ કર્માકર્મોભયચ્યુતાઃ ॥ ૬૯ ॥

સ્વાનુભૂતિં વરિષ્ઠાં તાં સર્વાનુષ્ઠાનવર્જિતામ્ ।
સર્વાનુષ્ઠાનવન્તોઽપિ સિદ્ધામાહુર્બતાત્મનામ્ ॥ ૭૦ ॥

અભેદધ્યાનસાધ્યાં તાં સ્વાનુભૂતિં મહત્તમામ્ ।
વિચારસાધ્યાં મન્યન્તે તે મહાપાપકર્મિણઃ ॥ ૭૧ ॥

નિદિધ્યાસનમપ્યાત્મા ભેદાભિધ્યાનલક્ષણમ્ ।
ઉપેક્ષન્તે વૃથાદ્વૈતજ્ઞાનવાદૈકમોહતઃ ॥ ૭૨ ॥

આશ્રિત્યૈવ વિચારં યે વાક્યાર્થમનનાત્મકમ્ ।
મન્યન્તે કૃતકૃત્યત્વમાત્મનાં તે હિ મોહિતાઃ ॥ ૭૩ ॥

આદ્યજ્ઞાનોદયે કામ્યકર્મત્યાગ ઉદીર્યતે ।
દ્વિતીયસમ્યગ્જ્ઞાને તુ નૈમિત્તિકનિરાકૃતિઃ ॥ ૭૪ ॥

તૃતીયપૂર્ણજ્ઞાને ચ નિત્યકર્મનિરાકૃતિઃ ।
ચતુર્થાદ્વૈતબોધે તુ સોઽતિવર્ણાશ્રમી ભવેત્ ॥ ૭૫ ॥

નિત્યનૈમિત્તિકોપેતજ્ઞાનાન્મુક્તિઃ ક્રમાદ્ભવેત્ ।
સમ્યગ્જ્ઞાનાત્તુ સા જીવન્મુક્તિર્નિત્યૈકસંયુતાત્ ॥ ૭૬ ॥

પૂર્ણજ્ઞાનાદ્વિદેહાખ્યા શાશ્વતી મુક્તિરિષ્યતે ।
યથા નૈષ્કર્મ્યસંસિદ્ધિર્જીવન્મુક્તે નિરંકુશા ॥ ૭૭ ॥

અત્રૈવં સતિ નૈષ્કર્મ્યં જ્ઞાનકર્મસમુચ્ચયાત્ ।
સિધ્યેત્ક્રમેણ સદ્યો વા નાન્યથા કલ્પકોટિભિઃ ॥ ૭૮ ॥

યાવદ્વિદેહમુક્તિઃ સા ન સિધ્યતિ શરીરિણઃ ।
તાવત્સમુચ્ચયઃ સિદ્ધો જ્ઞાનોપાસનકર્મણામ્ ॥ ૭૯ ॥

તસ્માદ્ જ્ઞાત્વા પરાત્માનં ધ્યાનનિષ્ઠો મહામતિઃ ।
ભૂયાન્નિજાશ્રમાચારનિરતઃ શ્રેયસે સદા ॥ ૮૦ ॥

જ્ઞાનોપાસ્તી કર્મસાપેક્ષકે તે
      કર્મોપાસ્તી જ્ઞાનસાપેક્ષકે ચ ।
કર્મજ્ઞાને ચાન્યસાપેક્ષકે તન્-
      મુક્ત્યૈ પ્રોક્તં સાહચર્યં ત્રયાણામ્ ॥ ૮૧ ॥

જ્ઞાનોપાસ્તી સ્વીયકર્મસ્વપાસ્યાપેક્ષં
      મુક્તિર્નૈવ કસ્યાપિ સિધ્યેત્ ।
તસ્માદ્ધીમાનાશ્રયેદપ્રમત્તસ્ત્રી-
      ણ્યુક્તાનિ શ્રદ્ધયાઽઽદેહપાતાત્ ॥ ૮૨ ॥

॥ ઇતિ સૂર્યગીતાયાં પ્રથમોઽધ્યાયઃ ॥

॥ અથ દ્વિતીયોઽધ્યાયઃ ॥

સૂર્ય ઉવાચ -
અથાતઃ સમ્પ્રવક્ષ્યામિ કર્મણાં પંચભૂમિકાઃ ।
ઉત્તરોત્તરમુત્કર્ષાદ્વિદ્ધિ સોપાનપંક્તિવત્ ॥ ૧ ॥

પ્રથમા તાંત્રિકી પ્રોક્તા પરા પૌરાણિકી મતા ।
સ્માર્તા તૃતીયા તુર્યા તુ શ્રૌતા સંકીર્તિતા બુધૈઃ ॥ ૨ ॥

પંચમી ત્વૌપનિષદા વિબુધોત્તમસંમતા ।
યસ્યાઃ પરં ન કિંચિત્સ્યાદ્વાચ્યં જ્ઞેયં ચ સત્તમ ॥ ૩ ॥

સ્વેચ્છં કર્માણિ કુર્વન્યઃ પ્રમાણાશ્રયણં વિના ।
તન્ત્રોક્તાનિ કરોત્યેષ કર્મી પ્રાથમિકો મતઃ ॥ ૪ ॥

તાનિ તન્ત્રોક્તકર્માણિ ત્યક્ત્વા પૌરાણિકાનિ યઃ ।
કરોતિ તન્ત્રસમ્બન્ધીન્યયં કર્મી દ્વિતીયકઃ ॥ ૫ ॥

ત્યક્ત્વા તાન્યપિ યઃ સ્માર્તાન્યનુતિષ્ઠતિ સર્વદા ।
શ્રુતિસમ્બન્ધવન્ત્યેષ તૃતીયઃ કર્મ્યુદીર્યતે ॥ ૬ ॥

યશ્ચ તાન્યપિ સન્ત્યજ્ય શ્રૌતાન્યેવાચરત્યયમ્ ।
કર્મી ધર્માર્થકામાનાં સ્થાનં તુર્યોઽભિધીયતે ॥ ૭ ॥

શ્રૌતાન્યપિ ચ યસ્ત્યક્ત્વા સદૌપનિષદાનિ વૈ ।
કરોતિ શ્રદ્ધયા કર્માણ્યયં મોક્ષી તુ પંચમઃ ॥ ૮ ॥

યાન્યૌપનિષદાનાં સ્યુરવિરોધીનિ કર્મણામ્ ।
શ્રૌતાદીનિ સુસંગ્રાહ્યાન્યમલાનિ મુમુક્ષુભિઃ ॥ ૯ ॥

કર્માણ્યુપનિષત્સુ સ્યુર્બ્રહ્મૈકાર્થાસુ વૈ કથમ્ ।
ઇતિ શંક્યન્નકુર્વન્ હિ વિધિરસ્તિ જિજીવિષેત્ ॥ ૧૦ ॥

ઈશાવાસ્યાદિવેદાન્તપ્રોક્તાન્યામરણાદપિ ।
કુર્વન્નેવ વિમુચ્યેત બ્રહ્મવિત્પ્રવરોઽસ્તુ વા ॥ ૧૧ ॥

યતયસ્ત્યક્તગાર્હસ્થ્યા અપિ સ્વોચિતકર્મભિઃ ।
આશ્રમં પાલયન્તઃ સ્વં કૈવલ્યં પ્રાપ્નુયુઃ પરમ્ ॥ ૧૨ ॥

કર્મ પ્રજાધનાનાં યસ્ત્યાગઃ સમભિધીયતે ।
કામૈકવિષયત્વેન સ યતેર્ન વિરુધ્યતે ॥ ૧૩ ॥

સંન્યાસિનો હિ કર્માણિ નિત્યાનિ વિમલાનિ ચ ।
શ્રેયોર્થાનિ વિધીયન્તે પરિવ્રાજેબ્જજન્મના ॥ ૧૪ ॥

અપેતકામ્યકર્માણો યતયોઽન્યેઽપિ વા જનાઃ ।
સદ્યઃ ક્રમેણ વા મુક્તિમાપ્નુયુર્નાત્ર સંશયઃ ॥ ૧૫ ॥

પંચમીં ભૂમિમારૂઢઃ જ્ઞાનોપાસનકર્મભિઃ ।
શોકમોહાદિનિર્મુક્તઃ સર્વદૈવ વિરાજતે ॥ ૧૬ ॥

ન જ્ઞાનેન વિનોપાસ્તિર્નોપાસ્ત્યા ન વિનેતરત્ ।
કર્માપિ તેન હેતુત્વં પૂર્વપૂર્વસ્ય કથ્યતે ॥ ૧૭ ॥

યદ્વા યાવન્ન હિ જ્ઞાનં તાવન્નોપાસનં મતમ્ ।
યાવન્નોપાસનં તાવન્ન જ્ઞાનં ચ કથંચન ॥ ૧૮ ॥

જ્ઞાનં યાવન્ન કર્માપિ ન તાવન્મુખ્યમીર્યતે ।
યાવન્ન કર્મ તાવચ્ચ ન જ્ઞાનં સાધુસંમતમ્ ॥ ૧૯ ॥

યાવન્નોપાસનં તાવન્ન કર્માપિ પ્રશસ્યતે ।
યાવન્ન કર્મોપાસ્તિશ્ચ ન તાવત્સાત્ત્વિકી મતા ॥ ૨૦ ॥

જ્ઞાનોપાસનકર્માણિ સાપેક્ષાણિ પરસ્પરમ્ ।
પ્રયચ્છન્તિ પરાં મુક્તિં નાન્યથેત્યુક્તમેવ તે ॥ ૨૧ ॥

એતેષુ સાધનેષ્વેકં ત્રિષુ યત્કિંચિદત્ર યઃ ।
ત્યજેદસદ્ગુરૂક્ત્યા સ નાશ્નુવીત પરામૃતમ્ ॥ ૨૨ ॥

નાનાવિધાનિ જ્ઞાનાનિ નાનારૂપા ઉપાસ્તયઃ ।
નાનાવિધાનિ કર્માણિ શ્રુત્યન્તાદિષુ સંવિદુઃ ॥ ૨૩ ॥

સમ્બન્ધસ્તુ ત્રયાણાં સ્યાદુચિતઃ શિષ્ટવર્ત્મના ।
નિપુણૈશ્ચ સુવિજ્ઞેયમનુબન્ધચતુષ્ટયમ્ ॥ ૨૪ ॥

અનુબન્ધવિરોધેન ત્રયાણાં ચેત્સમુચ્ચયઃ ।
કૃતઃ સ સદ્યઃ પ્રાપ્નોતિ તૃપ્તિં માનવપુંગવઃ ॥ ૨૫ ॥

અનુબન્ધપરિજ્ઞાનં વિના મુક્ત્યૈ પ્રયત્નવાન્ ।
ન મુક્તિં વિન્દતે કોઽપિ સાધકાદિવિપર્યયાત્ ॥ ૨૬ ॥

ભોગાધિકારી મોક્ષં ચેત્ફલમિચ્છેત્કદાચન ।
અનુબન્ધસ્ય વિજ્ઞાનં કથં નુ સ્યાત્સમંજસમ્ ॥ ૨૭ ॥

અધિકારાનુગુણ્યેન સમ્બન્ધઃ પરિકીર્તિતઃ ।
તત્સમ્બન્ધાનુગુણ્યેન વિષયશ્ચ પ્રકીર્તિતઃ ॥ ૨૮ ॥

વિષયાનુગુણં પ્રોક્તં પ્રયોજનમતો બુધૈઃ ।
અનુબન્ધાઃ સુવિજ્ઞેયા જ્ઞાનોપાસનકર્મસુ ॥ ૨૯ ॥

વર્ણાશ્રમાણાં સર્વેષામનુષ્ઠેયેષુ કર્મસુ ।
અવિદ્વાન્ સંશયાત્મા ચેદનુવર્તેત પૂર્વકાન્ ॥ ૩૦ ॥

વિદ્વાન્ ચેત્સંશયાત્માભૂચ્છાસ્ત્રે સ્વમતિનિશ્ચિતમ્ ।
આચરેત્તુ ન શિષ્ટસ્યપ્યબુધસ્ય પિતુર્મતમ્ ॥ ૩૧ ॥

સ્વકૂટસ્થબુધાચારઃ સાધુસંવિદિતો યદિ ।

વિદ્વાનપિ ત્યજેત્સ્વીયં તદ્વિરુદ્ધમસંમતમ્ ॥ ૩૨ ॥

પૂર્વાચારાનુસરણં કર્મમાત્રે નિયમ્યતે ।
જ્ઞાનોપાસ્ત્યોસ્ત્વબાહ્યત્વાદન્યથાઽપિ ચ યુજ્યતે ॥ ૩૩ ॥

પૂર્વકેષ્વપિ સાંખ્યેષુ સ્વસ્ય યુજ્યેત યોગિતા ।
અન્યથાઽપિ ચ નૈતેન પ્રત્યવાયઃ કિયાનપિ ॥ ૩૪ ॥

યદિ પૂર્વવિરોધેન કુર્યાત્કર્માણિ માનવઃ ।
સ મૂર્ખો ભવતિ ક્ષિપ્રં પ્રત્યવાયી ન સંશયઃ ॥ ૩૫ ॥

નૈમિત્તિકાનામકૃતૌ કામ્યાનાં ચ ન કશ્ચન ।
પ્રત્યવાયોઽત્ર વાઽમુત્ર લોકે ભવિતુમર્હતિ ॥ ૩૬ ॥

નિત્યાનાં ત્વકૃતાવત્રામુત્ર વા પ્રત્યવાયભાક્ ।
ભવેદવશ્યકાર્યત્વાદાશ્રમચ્યુતિહેતવે ॥ ૩૭ ॥

ન સ્યાદકરણં હેતુરભાવાત્મતયા તતઃ ।
નિત્યાકરણહેતુઃ પ્રાક્કર્મ ચેત્પ્રત્યવાયકૃત્ ॥ ૩૮ ॥

અકૃતૌ પ્રત્યવાયસ્ય શ્રવણં વ્યર્થમેવ તત્ ।
પૂર્વકર્મફલાદન્યફલસ્યાનવધારણાત્ ॥ ૩૯ ॥

અતો નાભાવતા યુક્તા નિત્યકર્માકૃતેર્યથા ।
નિષિદ્ધાચરણં ભાવસ્તથૈવાકરણં મતમ્ ॥ ૪૦ ॥

વિહિતાકરણસ્યાપિ ભાવાત્મત્વોરરીકૃતેઃ ।
આસ્તિકત્વમિહ પ્રાહુરન્યથા નાસ્તિકત્વતઃ ॥ ૪૧ ॥

પૂર્વકર્મફલસ્યાપિ નિત્યાકરણકર્મણઃ ।
પાપસ્ય દુઃખહેતુત્વં પૃથગેવાવવધાર્યતે ॥ ૪૨ ॥

અજ્ઞાનાદ્વિહિતે લુપ્તે જ્ઞાનાદ્વા કર્મણિ સ્વકે ।
પ્રાયશ્ચિત્તી ભવેન્મર્ત્યો લભેદ્દુર્જન્મ વા પુનઃ ॥ ૪૩ ॥

બુદ્ધિપૂર્વં ત્યજન્નિત્યમનુતાપવિવર્જિતઃ ।
અનાશ્રમી નરો ઘોરં રૌરવં નરકં વ્રજેત્ ॥ ૪૪ ॥

જીવન્મુક્તસ્ય નિત્યેષુ યદિ લુપ્તાનિ કાનિચિત્ ।
ન તેન પ્રત્યવાયોઽસ્તિ કૈશ્ચિત્સ્વાશ્રમસિદ્ધિતઃ ॥ ૪૫ ॥

પ્રાયશ્ચિત્તનિવર્ત્યાનિ નિષિદ્ધાચરણાનિ ચ ।
પ્રાયશ્ચિત્તમકુર્વન્તમપિ લિમ્પન્તિ નૈવ તમ્ ॥ ૪૬ ॥

કર્મ શુદ્ધમશુદ્ધં ચ દ્વિવિધં પ્રોચ્યતે શ્રુતૌ ।
તત્રાશુદ્ધેન બન્ધઃ સ્યાન્મોક્ષઃ શુદ્ધેન દેહિનામ્ ॥ ૪૭ ॥

અશુદ્ધં ચ તથા પ્રોક્તં પુણ્યં પાપમિતિ દ્વિધા ।
પરસ્પરં ન બાધોઽસ્તિ તયોરત્રાવિરોધતઃ ॥ ૪૮ ॥

સુખદુઃખે સમસ્તસ્ય જન્તોર્યાભ્યાં પ્રસિધ્યતઃ ।
તયોર્ન વશમાગચ્છેચ્છુદ્ધમાત્રેણ સંસ્થિતઃ ॥ ૪૯ ॥

શુદ્ધં નિત્યમનન્તં યત્સત્યં કર્મ નિગદ્યતે ।
નિત્યશુદ્ધવિમુક્તાત્મસાક્ષાત્કારાર્થકં વિદુઃ ॥ ૫૦ ॥

વિશુદ્ધૈઃ કર્મભિઃ શુદ્ધાનીન્દ્રિયાણિ ભવન્ત્યલમ્ ।
ઇન્દ્રિયેષુ વિશુદ્ધેષુ મનઃ શુદ્ધં સ્વતો ભવેત્ ॥ ૫૧ ॥

શુદ્ધે મનસિ જીવોઽપિ વિશુદ્ધો બ્રહ્મણૈકતામ્ ।
ઉપેત્ય કેવલાનન્દં નિષ્કલં પરમશ્નુતે ॥ ૫૨ ॥

બાહ્યમાભ્યન્તરં ચેતિ શુદ્ધં કર્મ દ્વિધોચ્યતે ।
બાહ્યં સ્નાનાદિ નિત્યં સ્યાદ્ધ્યાનાદ્યાભ્યન્તરં પરમ્ ॥ ૫૩ ॥

અતઃ શુદ્ધેરશુદ્ધાનાં નાશો ભવિતુમર્હતિ ।
ન શુદ્ધવ્યતિરેકેણ પ્રયત્નાન્તરમિષ્યતે ॥ ૫૪ ॥

વિશુદ્ધકર્મનિષ્ઠાસ્તે યતયોઽન્યેઽપિ વા જનાઃ ।
અત્રૈવ પરિમુચ્યન્તે સ્વાતન્ત્ર્યેણ પરામૃતાત્ ॥ ૫૫ ॥

આરૂઢઃ પંચમીં ભૂમિં શુદ્ધેનૈવાવતિષ્ઠતે ।
અતોઽત્ર મતિમાન્નિત્યં પંચમ્યભ્યાસમાચરેત્ ॥ ૫૬ ॥

ઇન્દ્રિયાણિ વિશુદ્ધાન્યપ્યશુદ્ધાનાં વિવર્જનાત્ ।
શુદ્ધાનામપ્યનુષ્ઠાનાદ્ધીમાંસ્તાનિ ન વિશ્વસેત્ ॥ ૫૭ ॥

અશુદ્ધેષુ પ્રવર્તેરન્ પૂર્વવાસનયા સ્વતઃ ।
તેભ્યો નિયમ્ય શુદ્ધેષુ નિત્યં તાનિ પ્રવર્તયેત્ ॥ ૫૮ ॥

ઇન્દ્રિયાણાં ચ મનસઃ પ્રસાદં શુદ્ધકર્મભિઃ ।
ઉપલભ્યાપિ દુર્બુદ્ધિરશુદ્ધેહ પ્રવર્તતે ॥ ૫૯ ॥

પ્રસન્નમનસઃ સ્વાસ્થ્યાત્સુખં કિંચિત્પ્રજાયતે ।
તાવન્માત્રેણ તૃપ્તસ્તુ ક્રમેણાધઃ પતેન્નરઃ ॥ ૬૦ ॥

તૃપ્તિરલ્પસુખપ્રાપ્તૌ મહાનર્થૈકકારણમ્ ।
અતસ્તૃપ્તિમનાપ્યૈવ શુદ્ધં નિત્યં સમાચરેત્ ॥ ૬૧ ॥

યથા વિષયભોગેષુ વિના તૃપ્તિં પુનઃ પુનઃ ।
પ્રવર્તતે તથા નિત્યં યઃ શુદ્ધેષુ સ બુદ્ધિમાન્ ॥ ૬૨ ॥

શુદ્ધં શુદ્ધેન વર્ધેત શુદ્ધઃ શુદ્ધં તતો વ્રજેત્ ।
અશુદ્ધમપ્યશુદ્ધેનાશુદ્ધોઽશુદ્ધં તથા નરઃ ॥ ૬૩ ॥

યદેન્દ્રિયમનઃપ્રાણાઃ શાન્તાઃ સુપ્તાવિવાભવન્ ।
શુદ્ધાશુદ્ધોભયાતીતસ્તદા તૃપ્તિં પરાં વ્રજેત્ ॥ ૬૪ ॥

યાવન્નેન્દ્રિયસંશાન્તિર્યાવન્ન મનસોઽપ્યયઃ ।
યાવન્ન પ્રાણશાન્તિશ્ચ તાવચ્છુદ્ધં સમાચરેત્ ॥ ૬૫ ॥

પરસ્પરોપયોગિત્વાદ્બાહ્યાભ્યન્તરશુદ્ધયોઃ ।
વિયોગો નૈવ કાર્યોઽત્ર બુધૈરાદેહમોચનાત્ ॥ ૬૬ ॥

યઃ શુદ્ધપક્ષો હંસઃ સ ઊર્ધ્વં ગચ્છતિ ચામ્બરે ।
અશુદ્ધપક્ષઃ શ્યેનસ્તુ વ્યોમગોઽપિ પતત્યધઃ ॥ ૬૭ ॥

છિન્નૈકપક્ષો હંસોઽપિ નોર્ધ્વં ગન્તુમિતોઽર્હતિ ।
અતઃ શુદ્ધદ્વયં મુખ્યં સાધનં મુક્તયે વિદુઃ ॥ ૬૮ ॥

યદ્યપ્યાભ્યન્તરં શુદ્ધં બાહ્યશુદ્ધનિવર્તકમ્ ।
ભવત્યેતેન સામ્યં ન તયોરિતિ ચ કેચન ॥ ૬૯ ॥

તથાઽપિ બાહ્યવિલયસમકાલલયાત્પરમ્ ।
આભ્યન્તરં સમં તેન બાહ્યેન સ્યાત્સ્વકર્મણા ॥ ૭૦ ॥

આભ્યન્તરં ચ તચ્છુદ્ધં કર્મ દ્વિવિધમુચ્યતે ।
સમ્પ્રજ્ઞાતસમાધ્યાખ્યમસમ્પ્રજ્ઞાતનામ ચ ॥ ૭૧ ॥

જીવન્મુક્તેઃ પુરાવૃત્તમાદ્યં કર્મ સ્વમાનસમ્ ।
પુરા વિદેહમુક્તેસ્તુ વૃતમન્યત્સ્વમાનસમ્ ॥ ૭૨ ॥

માનસત્વાત્સમાધેશ્ચ કર્મત્વોક્તિર્ન દૂષ્યતે ।

અનન્યવિષયત્વાચ્ચ તત્ફલં નૈવ નશ્વરમ્ ॥ ૭૩ ॥

અન્તઃશુદ્ધિર્બહિઃશુદ્ધિં યથા નૃણામપેક્ષતે ।
બહિઃશુદ્ધિસ્તથૈવાન્તઃશુદ્ધિં ચ નિયમેન હિ ॥ ૭૪ ॥

યસ્ય કર્મસુ શુદ્ધેષ્વપ્યૌદાસીન્યં વિજાયતે ।
તસ્યૈવ જન્મસાંકર્યમનુમેયં વિપશ્ચિતા ॥ ૭૫ ॥

વિરોધો જાયતે યસ્ય જ્ઞાનકર્મસમુચ્ચયે ।
તસ્યૈવ જન્મસાંકર્યમનુમેયં વિપશ્ચિતા ॥ ૭૬ ॥

યઃ શ્રૌતં કર્મ હિત્વાન્યત્તાન્ત્રિકં સમુપાશ્રયેત્ ।
તસ્યૈવ જન્મસાંકર્યમનુમેયં વિપશ્ચિતા ॥ ૭૭ ॥

યશ્ચાન્તરં ચ તત્કર્મ મન્યતે મન્દગોચરમ્ ।
તસ્યૈવ જન્મસાંકર્યમનુમેયં વિપશ્ચિતા ॥ ૭૮ ॥

અશુદ્ધકર્મનિષ્ઠઃ સન્ શુદ્ધં નિન્દતિ યઃ સદા ।
તસ્યૈવ જન્મસાંકર્યમનુમેયં વિપશ્ચિતા ॥ ૭૯ ॥

શુદ્ધં પશ્યતિ યઃ શાન્તમક્ષિરોગીવ ભાસ્કરમ્ ।
તસ્યૈવ જન્મસાંકર્યમનુમેયં વિપશ્ચિતા ॥ ૮૦ ॥

વિશુદ્ધવંશપ્રભવં મહામતિં
    વિશુદ્ધબાહ્યાન્તરકર્મભાસ્વરમ્ ।
વિશુદ્ધવેદાન્તરહસ્યવેદિનં
    વિદ્વેષ્ટિ યઃ સંકર એવ નેતરઃ ॥ ૮૧ ॥

અશુદ્ધવંશપ્રભવં સુદુર્મતિં
    સ્વશુદ્ધકર્મદ્વયનષ્ટતેજસમ્ ।
અશુદ્ધતન્ત્રાર્થવિદં નરાધમં
    યઃ શ્લાઘતે સંકર એવ નેતરઃ ॥ ૮૨ ॥

ઇતિ સૂર્યગીતાયાં દ્વિતીયોઽધ્યાયઃ ॥

॥ અથ તૃતીયોઽધ્યાયઃ ॥

અથાતઃ સમ્પ્રવક્ષ્યામિ મમાન્તર્યામિણં શિવમ્ ।
યઃ સર્વકર્મણાં સાક્ષી નિર્લેપઃ પ્રભુરીશ્વરઃ ॥ ૧ ॥

ત્રિનેત્રં નીલકણ્ઠં યં સામ્બં મૃત્યુંજયં હરમ્ ।

ધ્યાત્વા સંસૃતિમોક્ષઃ સ્યાત્તં નમામિ મહેશ્વરમ્ ॥ ૨ ॥

સર્વેષાં કર્મણામેકઃ ફલદાતા ય ઉચ્યતે ।
સ એવ મૃડ ઈશાનઃ સર્વજ્ઞઃ સર્વશક્તિમાન્ ॥ ૩ ॥

યસ્ય સ્મરણમાત્રેણ નિવર્તન્તેઽખિલાપદઃ ।
સમ્પદશ્ચેહ લભ્યન્તે સોઽન્તર્યામી શિવો હરઃ ॥ ૪ ॥

યેનૈવ સૃષ્ટમખિલં જગદેતચ્ચરાચરમ્ ।
યસ્મિંસ્તિષ્ઠતિ નશ્યત્યપ્યેષ એકો મહેશ્વરઃ ॥ ૫ ॥

યં નમન્તિ સુરાઃ સર્વે સ્વસ્વાભીષ્ટપ્રસિદ્ધયે ।
સ્વાતન્ત્ર્યં યસ્ય સર્વત્ર સોઽન્તર્યામિ મહેશ્વરઃ ॥ ૬ ॥

ઉમાર્ધવિગ્રહઃ શમ્ભુઃ ત્રિનેત્રઃ શશિશેખરઃ ।
ગંગાધરો મહાદેવઃ સોઽન્તર્યામિ દયાનિધિઃ ॥ ૭ ॥

શ્રુતિસ્મૃતિપુરાણેષુ યસ્યૈવાધિક્યમિષ્યતે ।
યસ્યાધિક્યસ્મૃતેર્મુક્તિઃ સોઽન્તર્યામી પુરાતનઃ ॥ ૮ ॥

યન્નામજપમાત્રેણ પુરુષઃ પૂજ્યતે સુરૈઃ ।
યમાહુઃ સર્વદેવેશં સોઽન્તર્યામી ગુરૂત્તમઃ ॥ ૯ ॥

યદાખ્યામૃતપાનેન સંતૃપ્તા મુનયોઽખિલાઃ ।
ન વાઞ્છન્તિ મહાભોગાન્ સોઽન્તર્યામી જગત્પતિઃ ॥ ૧૦ ॥

અરુણ ઉવાચ -
સદ્ગુરો ભાસ્કર શ્રીમન્ સર્વતત્ત્વાર્થકોવિદ ।
શ્રુતિસ્મૃતિપુરાણેષુ હ્યન્તર્યામ્યન્યથા શ્રુતઃ ॥ ૧૧ ॥

સત્યં જ્ઞાનમનન્તં યત્પ્રસિદ્ધં બ્રહ્મ નિષ્કલમ્ ।
નિર્ગુણં નિષ્ક્રિયં શાન્તં કેવલં સર્વગં પરમ્ ॥ ૧૨ ॥

તદેવ સર્વાન્તર્યામી શ્રુતં સર્વાન્તરત્વતઃ ।
વરેણ્યં સવિતુસ્તે ચ ગાયત્ર્યાં તદ્ધિ કથ્યતે ॥ ૧૩ ॥

અશરીરસ્ય તસ્યૈવ હ્યાદિમધ્યાન્તવર્જનાત્ ।
આકાશવદ્વિભૂતેન સર્વાન્તર્યામિતોચિતા ॥ ૧૪ ॥

શિવસ્ય સશરીરસ્ય સામ્બસ્ય સગુણસ્ય તુ ।
અવિભુત્વેન સા નૈવ યુજ્યતે ભાસ્કર પ્રભો ॥ ૧૫ ॥

સગુણૈકપ્રધાનૈશ્ચ વિશિષ્ટાદ્વૈતવાદિભિઃ ।
કૈશ્ચિદ્બ્રહ્મહરીશાનામન્તર્યામિત્વમુચ્યતે ॥ ૧૬ ॥

સર્વજ્ઞત્વાદિધર્માણાં સમત્વં ચ ત્રિમૂર્તિષુ ।
મત્વૈવોપાસતે વિપ્રાઃ તે ગાયત્રીપરાયણાઃ ॥ ૧૭ ॥

કેચિદ્ દ્રુહિણ એવ સ્યાદન્તર્યામી વાક્પતિઃ ।
નાન્યૌ હરિહરૌ કર્મપ્રસિદ્ધેરિતિ વૈ વિદુઃ ॥ ૧૮ ॥

કેચિત્તુ વિષ્ણુરેવ સ્યાદન્તર્યામી રમાપતિઃ ।
ન વિધીશૌ પરોપાસ્તિપ્રસિદ્ધેરિતિ વૈ વિદુઃ ॥ ૧૯ ॥

કેચિચ્ચ શિવ એકઃ સ્યાદન્તર્યામી હ્યુમાપતિઃ ।
નાન્યૌ બ્રહ્મહરી જ્ઞાનપ્રસિદ્ધેરિતિ સંવિદુઃ ॥ ૨૦ ॥

ત્વદુક્તરીત્યા ત્વાધિક્યં જ્ઞાનોપાસનકર્મસુ ।
કર્મણોઽવગતં તેન વિધેરેવ પ્રસિધ્યતિ ॥ ૨૧ ॥

એષ પક્ષઃ સમીચીનસ્તવ નૈવ ભવિષ્યતિ ।
તસ્માદનિશ્ચિતાર્થં માં કુરુષ્વાસંશયં પ્રભો ॥ ૨૨ ॥

સૂર્ય ઉવાચ -
સમ્યક્પૃષ્ટં ત્વયા ધીમન્નરુણ શ ृણુ સાદરમ્ ।
વક્ષ્યામિ નિશ્ચિતાર્થં તે શ્રુતિસ્મૃત્યાદિભિઃ સ્ફુટમ્ ॥ ૨૩ ॥

અન્તર્યામી દ્વિધા પ્રોક્તઃ સગુણો નિર્ગુણોઽપિ ચ ।
ચરસ્ય કેવલં ત્વાદ્યશ્ચરસ્યાન્યોઽચરસ્ય ચ ॥ ૨૪ ॥

અહં હિ ચર એવાસ્મિ મદન્તર્યામિણાવુભૌ ।
ગાયત્ર્યાં ચાવગન્તવ્યૌ દેવૌ સગુણનિર્ગુણૌ ॥ ૨૫ ॥

નિર્ગુણશ્ચાવગન્તવ્યઃ સગુણદ્વારતોઽખિલૈઃ ।
અતોઽબ્રુવં શિવં સાક્ષાન્મદન્તર્યામિણં તવ ॥ ૨૬ ॥

કારણત્વં યથા સિદ્ધં બ્રહ્મણઃ પરમાત્મનઃ ।
યથા શિવસ્ય સામ્બસ્ય કાર્યત્વં ચ સતાં મતમ્ ॥ ૨૭ ॥

તથા શિવસ્ય હેતુત્વં વિષ્ણોઃ કાર્યત્વમપ્યથ ।
વિષ્ણોશ્ચ હેતુતાં તદ્વદ્વિધેર્વિદ્ધિ ચ કાર્યતામ્ ॥ ૨૮ ॥

બ્રહ્મા વિષ્ણુઃ શિવો બ્રહ્મ હ્યુત્તરોત્તરહેતવઃ ।
ઇતિ જાનન્તિ વિદ્વાંસો નેતરે માયયા વૃતાઃ ॥ ૨૯ ॥

વિશિષ્ટાદ્વૈતિનો વાઽન્યે સગુણૈકાભિમાનિનઃ ।
અશરીરાનભિજ્ઞત્વાન્માયાપરવશા ધ્રુવમ્ ॥ ૩૦ ॥

સર્વજ્ઞત્વાદિધર્માણાં કથં સામ્યં ત્રિમૂર્તિષુ ।
ત્રયાણાં ચ ગુણાનાં હિ વૈષમ્યં સર્વસંમતમ્ ॥ ૩૧ ॥

ગુણત્રયવશાત્તેષાં વૈષમ્યં વિદ્ધિ સુસ્થિતમ્ ।
બ્રહ્મા હિ રાજસઃ પ્રોક્તો વિષ્ણુસ્તામસ ઉચ્યતે ॥ ૩૨ ॥

રુદ્રઃ સ સાત્ત્વિકઃ પ્રોક્તઃ મૂર્તિવર્ણૈશ્ચ તાદૃશાઃ ।
ચિત્સ્વરૂપાનુભૂત્યા ચ તારતમ્યં નિગદ્યતે ॥ ૩૩ ॥

નિર્વિશેષપરબ્રહ્માનન્યત્વેન તુ તે સમાઃ ।
તથાઽપિ શિવશબ્દસ્ય પરબ્રહ્માત્મકત્વતઃ ॥ ૩૪ ॥

સાક્ષિણા નિર્વિકારેણ ચિન્માત્રેણ મહાત્મના ।
સદાશિવેન નિત્યેન કેવલેન સમો ન હિ ॥ ૩૫ ॥

સામ્બસ્ય ચન્દ્રચૂડસ્ય નીલકણ્ઠસ્ય શૂલિનઃ ।
ઉત્કર્ષોઽસ્તિ સ્વતઃસિદ્ધઃ કિં મયા પ્રતિપાદ્યતે ॥ ૩૬ ॥

આદૌ માં જનયામાસ બ્રહ્મા સાક્ષાચ્ચતુર્મુખઃ ।
યથા તથા વિરિંચિં તં શ્રીમાન્નારાયણો હરિઃ ॥ ૩૭ ॥

યતોઽભવન્મહાવિષ્ણુર્મમારુણ પિતામહઃ ।
તતો મે સુપ્રસિદ્ધભૂત્સૂર્યનારાયણ અભ્ધા ॥ ૩૮ ॥

નૈતેન સકલેશસ્ય પ્રપિતામહતાવશાત્ ।
સર્વોત્કૃષ્ટત્વસંસિદ્ધ્યા લુપ્યતે હ્યાન્તરાત્મના ॥ ૩૯
અથ વા યોગવૃત્યા સ્યાચ્છિવો નારાયણાભિધઃ ।
તદ્દૃષ્ટિર્મયિ કર્તવ્યોપાસકરિતિ સન્મતમ્ ॥ ૪૦ ॥

કર્મોપાસનબોધેષુ બ્રહ્મવિષ્ણુશિવાઃ ક્રમાત્ ।
પ્રસિદ્ધા ઇતિ સંત્યજ્ય ધિયં શ◌ૃણુ વચો મમ ॥ ૪૧ ॥

ત્રિષુ ત્રયઃ પ્રસિદ્ધાઃ સ્યુસ્તારતમ્યેન ચારુણ ।
કામ્યકર્મપ્રધાનોઽસ્તિ સ્વયંભૂશ્ચતુરાનનઃ ॥ ૪૨ ॥

નૈમિત્તિકપ્રધાનસ્તુ વિષ્ણુઃ કમલલોચનઃ ।
નિત્યકર્મપ્રધાનઃ સ શિવઃ સાક્ષાત્ત્રિલોચનઃ ॥ ૪૩ ॥

મૂર્ત્યુપાસ્તૌ વિધિમુખ્યસ્ત્વંશોપાસ્તૌ હરિર્મતઃ ।
નિરંશોપાસને મુખ્યો નીલકણ્ઠો હરો મતઃ ॥ ૪૪ ॥

જ્ઞાને શ્રવણજે બ્રહ્મા વિજ્ઞાને મનનોદિતે ।
વિષ્ણુઃ સ સમ્યગ્જ્ઞાને તુ નિદિધ્યાસનજે શિવઃ ॥ ૪૫ ॥

અત્રૈવં સતિ કસ્યાભૂદાધિક્યમરુણાધુના ।
ત્વમેવ સમ્યગાલોચ્ય વિનિશ્ચિનુ મહામતે ॥ ૪૬ ॥

પુરા કશ્ચિન્મહાધીરઃ શિવભક્તાગ્રણીર્દ્વિજઃ ।
શિવાખ્યાજપસંસક્તશ્ચચાર ભુવિ નિસ્પૃહઃ ॥ ૪૭ ॥

સ્વાશ્રમાચારનિરતો ભસ્મરુદ્રાક્ષભૂષણઃ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ કામક્રોધાદિવર્જિતઃ ॥ ૪૮ ॥

શમાદિષટ્કસમ્પન્નઃ શિવભક્તજનાદરઃ ।
શિવસ્ય વૈભવં સ્મૃત્વા શ્રુતિસ્મૃતિપુરાણગમ્ ॥ ૪૯ ॥

સર્વેશ્વરસ્ય સામ્બસ્ય ત્રિનેત્રસ્ય દયાનિધેઃ ।
સદાશિવસ્ય માહાત્મ્યં સ્વત એવેદમબ્રવીત્ ॥ ૫૦ ॥

પશ્વાદિભ્યો વરિષ્ઠાઃ ક્ષિતિગતમનુજાસ્તેભ્ય એવેન્દ્રમુખ્યઃ
દેવાસ્તેભ્યો વિધાતા હરિરપિ ચ તતઃ શઙ્કરો યસ્ત્રિનેત્રઃ ।
નાન્યોઽસ્માચ્છંકરાત્તુ શ્રુતિષુ નિગદિતો વા વરિષ્ઠઃ સમો વા
સર્વાન્વિષ્ણ્વાદિકાંસ્તં ન હિ વયમધુના નૂનમેવાશ્રયામઃ ॥ ૫૧ ॥

મૂલાધારે ગણેશસ્તદુપરિ તુ વિધિર્વિષ્ણુરસ્માત્તતોઽયં
રુદ્રસ્થાને ચતુર્થે શ્રુતિરપિ ચ તથા પ્રાહ શાન્તં ચતુર્થમ્ ।
અસ્માદન્યઃ શિવોઽસ્તિ ત્રિપુરહર ઇતો વા સદાદ્યઃ શિવોઽસ્તિ
સ્વસ્થોઽયં દ્વાદશાન્તપ્રબલનટનકૃચ્ચાપિ સાક્ષાત્સભેશઃ ॥ ૫૨ ॥

રૌદ્રી શક્તિસ્તથા સ્યાદયમપિ ચ હરિઃ શાક્ત એવં વિરિંચો
મન્તવ્યો વૈષ્ણવોઽમી સનકમુખમહાબ્રાહ્મણા બ્રાહ્મણાશ્ચ ।
તસ્માદેવં વિભક્તે ન હિ ભવતિ હરેરંશિતાંશાંશિભાવે
સાક્ષાદપ્યત્ર નિત્યં પરમશિવમહં ચાંશિનં તં નમામિ ॥ ૫૩ ॥

શમ્ભોરન્યન્ન પશ્યામ્યહમિહ પરમે વ્યોમ્નિ સોમાચ્છ્રુતૌ વા
યસ્યૈવૈતેન ભાસા જગદખિલમિદં ભાસતે ચૈત્યરૂપમ્ ।
યચ્છીર્ષાઙ્ઘ્રી દિદૃક્ષુ દ્રુહિણમુરરિપુ સર્વશક્ત્યાપ્ય દૃષ્ટ્વા
ખેદન્તૌ જગ્મતુસ્તં પરમશિવમમું ત્વાં વિના કં નુ વન્દે ॥ ૫૪ ॥

યં વિષ્ણુર્નાવપશ્યત્યખિલજનભયધ્વંસકં કાશિકાયાં
લિંગં ચોપાસ્ત ઇત્યપ્યધિકભસિતરુદ્રાક્ષસંભૂષિતઃ સન્ ।
જાબાલેયે બૃહત્યપ્યથ હરિજનિતા શ્રૂયતે સોમ એકઃ
પાયાચ્છ્રુત્યન્તસિદ્ધો જનિમૃતિભયભૃત્સંસૃતેસ્તારકો મામ્ ॥ ૫૫ ॥

મધ્યે કો વાઽધિકઃ સ્યાદ્દ્રુહિણ હરિહરાણામિતિ પ્રશ્નપૂર્વં
બ્રહ્માદૌ પૈપ્પલાદં ખલુ વદતિ મહાન્રુદ્ર એવાધિકઃ સ્યાત્ ।
ઇત્યુક્ત્વા શારભાખ્યે શ્રુતિશિરસિ નમશ્ચાસ્તુ રુદ્રાય તસ્મૈ
સ્તુત્વૈવં ધ્યેયમાહ ત્રિપુરહરમુમાકાંતમેકં ભજેઽહમ્ ॥ ૫૬ ॥

ધ્યાતા રુદ્રો રમેશો હરિરપિ તુ તથા ધ્યાનમેકઃ શિવસ્તુ
ધ્યેયોઽથર્વશ્રુતેઃ સા નિખિલરસવતી યા સમાપ્તા શિખાભૂત્ ।
ધ્યેયશ્ચિન્માત્ર એકઃ પરમશિવ ઇતો વા ચિદંદશત્વ-
મસ્ય ધ્યાતુઃ સ્યાન્ન ત્વમુષ્ય પ્રકૃતિભવમનોવૃત્તિરૂપસ્ય વિષ્ણોઃ ॥ ૫૭ ॥

એકો રુદ્રો મહેશઃ શિવ ઇતિ ચ મહાદેવ એવૈષ સર્વ
વ્યાપી યઃ શ્રૂયતેઽસ્મિંચ્છ્રુતિશિરસિ તથાથર્વશીર્ષાભિધે ચ ।
દેવાઃ સર્વે યદન્તસ્થિતિજુષ ઇહ તે વિષ્ણુપૂર્વાસ્તતોન્યઃ
કો વાઽસ્યાદ્વ્યાપકોઽસ્માન્નિરતિશયચિદાકાશરૂપાન્મહેશાત્ ॥ ૫૮ ॥

નાભૌ બ્રહ્માણમુક્ત્વા હરિમપિ હૃદયે રુદ્રમેનં ભ્રુવોસ્ત-
ન્મધ્યે શ્રુત્યન્ત એવં પ્રણવવિવરણે નારસિંહાભિધે ચ ।
વિજ્ઞેયઃ સોઽયમાત્મા શિવ ઇતિ ચ ચતુર્થોઽદ્વિતીયઃ
પ્રશાન્તશ્ચેત્યાહાન્તે પ્રજેશસ્ત્રિદશપરિપદસ્તત્સ ઈશઃ પ્રપૂજ્યઃ ॥ ૫૯ ॥

કૈવલ્યં પ્રાપ્નુયાત્કઃ પુરુષ ઇહ શિવં કેવલં ત્વાં વિહાય
સ્વામિન્નીશં તથાન્યં જગતિ સદસતોરત્ર વિષ્ણોર્વિધેર્વા ।
ચિન્માત્રઃ પ્રત્યગાત્મા ત્વમસિ ખલુ સદા પૂર્વ એકઃ શિવોઽત-
સ્ત્વામેવૈકં ભજેઽહં સતતમપિ જગત્સાક્ષિણં નિર્વિશેષમ્ ॥ ૬૦ ॥

સૂર્ય ઉવાચ -
એવં શિવસ્ય માહાત્મ્યે સર્વશ્રુત્યન્તનિશ્ચિતે ।

ઉદ્ભવેત્સંશયઃ કસ્ય કો મુચ્યેત સંશયાત્ ॥ ૬૧ ॥

અતોરુણ મહાપ્રાજ્ઞ મુખ્યાન્તર્યામિણં મમ ।
ત્રિનેત્રં ભજ કૈવલ્યસંસિધ્યૈ પરમેશ્વરમ્ ॥ ૬૨ ॥

॥ ઇતિ સૂર્યગીતાયાં તૃતીયોઽધ્યાયઃ ॥

॥ અથ ચતુર્થોઽધ્યાયઃ ॥

સૂર્ય ઉવાચ -
અથાતઃ સમ્પ્રવક્ષ્યામિ તસ્યાન્તર્યામિણો ગુરોઃ ।
જગત્સૃષ્ટ્યાદિકર્માણિ લીલારૂપાણિ સુવ્રત ॥ ૧ ॥

આદૌ જગત્સસર્જેદં પંચીકરણકર્મણા ।
યઃ સ ઈશો મહામાયઃ સર્વજ્ઞઃ સર્વશક્તિમાન્ ॥ ૨ ॥

ચતુર્વિધેષુ ભૂતેષુ નિજમાયાવશીકૃતાન્ ।
જીવાન્ પ્રવેશયિત્વાનનુપ્રવિવેશ સ્વયં વશી ॥ ૩ ॥

લીલારૂપમપીદં ચ કર્મ તસ્ય મહેશિતુઃ ।
પ્રારબ્ધકર્મજં જ્ઞેયમાધિકારિકતાવશાત્ ॥ ૪ ॥

સ હ્યાદિકારિકઃ શ્રેષ્ઠઃ પૂર્વં જીવત્વમાગતઃ ।
સમુચ્ચયાદભૂદીશો જ્ઞાનોપાસનકર્મણામ્ ॥ ૫॥

પ્રાક્કલ્પાધિકૃતો દેવઃ સ્વારબ્ધક્ષપણાત્સ્વયમ્ ।
અપહાય નિજાં માયાં પ્રાપ્તવાન્ પરમં પદમ્ ॥ ૬ ॥

અથ તામાશ્રિતો જીવઃ કલ્પાદૌ પૂર્વવત્ક્રમાત્ ।
સૃષ્ટ્વા સર્વાધિકારી સન્ જગત્પાતિ ચ હન્તિ ચ ॥ ૭ ॥

ક્રિયમાણતયા તેન નિયમેનૈવ કર્મણામ્ ।
ત્રયાણાં તસ્ય કર્મિત્વમીશસ્યાપ્યુપપદ્યતે ॥ ૮ ॥

જીવન્મુક્તસમાનત્વં યતસ્તસ્યાવગમ્યતે ।
અતઃ પ્રારબ્ધકર્મિત્વં અવશ્યં તસ્ય સિધ્યતિ ॥ ૯ ॥

બ્રહ્મવિત્ત્વં હિ તસ્ય સ્યાન્ન તુ બ્રહ્મત્વમીશિતુઃ ।
સૃષ્ટ્યાદિકર્મકર્તૃત્વદર્શનાન્માયયાઽપિ વા ॥ ૧૦ ॥

જીવસૃષ્ટ્યાદિકર્તૃત્વં બ્રહ્મણોઽપિ વર્તતે ।

તથાપિ પૂર્વકર્મિત્વં તસ્ય ન શ્રૂયતે ક્વચિત્ ॥ ૧૧ ॥

કર્મણઃ પ્રાગભાવત્વાદ્ભાવત્વાદ્બ્રહ્મણો વિભોઃ ।
પૂર્વકર્મવતો હિ સ્યાત્કર્મ પ્રારબ્ધસંજ્ઞિતમ્ ॥ ૧૨ ॥

સૃષ્ટ્યાદિકર્મબદ્ધત્વે તસ્ય માયાવશત્વતઃ ।
વશ્યમાયત્વવચનં વ્યર્થમેવેતિ ચેન્ન ચ ॥ ૧૩ ॥

સ્વાધિકારાવસને હિ કૈવલ્યં નોપરુધ્યતે ।
અતસ્તસ્ય પ્રસિદ્ધં તદ્વશ્યમાયત્વમર્થવત્ ॥ ૧૪ ॥

સ્થિતૌ તુ તસ્ય માયિત્વં કામિત્વાદિવદિષ્યતે ।
ન ધનિત્વાદિવત્કર્મ પારવશ્યાન્નિરન્તરમ્ ॥ ૧૫ ॥

જાગ્રદ્વત્સૃષ્ટિકર્મ સ્યાત્સ્વપ્નવત્સ્થિતિકર્મ ચ ।
જગત્પ્રલયકર્મ સ્યાત્ સુષુપ્તિવત્તસ્ય માયિનઃ ॥ ૧૬ ॥

અવસ્થાત્રયવત્ત્વેન કર્મત્રિતયવત્તયા ।
શરીરત્રયવત્ત્વેન જીવઃ સોઽપીતિ કેચન ॥ ૧૭ ॥

તદયુક્તં પુરા જીવોઽપ્યથ બ્રહ્માત્મવિત્તયા ।
સર્વજ્ઞત્વાદિસમ્પત્ત્યા સ હિ જીવવિલક્ષણઃ ॥ ૧૮ ॥

જીવન્મુક્તસમાનત્વાન્ન કર્મત્રયમીશિતુઃ ।
પ્રારબ્ધમાત્રબદ્ધત્વાદધિકારવશાદિહ ॥ ૧૯ ॥

અધિકારાવસાને તદ્બ્રહ્મત્વં સમ્ભવિષ્યતિ ।
ઇતિ વેદાન્તસિદ્ધેઽર્થે વ્યભિચારઃ કુતો ભવેત્ ॥ ૨૦ ॥

બ્રહ્મૈવૈકમકર્મોક્તં શ્રુતિભિઃ સ્મૃતિભિશ્ચ તત્ ।
ઈશસ્ય કર્મતોક્તિસ્તુ શ્રૂયતે હ્યૌપચારિકી ॥ ૨૧ ॥

સ કર્મત્વેઽપિ તસ્ય સ્યાત્કર્મમોચકતેશિતુઃ ।
સંચિતાગામિહીનત્વાત્સર્વજ્ઞત્વાચ્ચ સત્તમ ॥ ૨૨ ॥

ઈશ્વરબ્રહ્મણોર્ભેદં સકર્માઽકર્મતાદિભિઃ ।
સુપ્રસિદ્ધમપહ્નોતું કઃ સમર્થોઽસ્તિ માનતઃ ॥ ૨૩ ॥

ઈશ્વરસ્યાપ્યકર્મત્વં યદિ બ્રૂયાન્નિરંકુશમ્ ।
સ દ્વૈતી ન કદાપ્યસ્માત્સંસારાન્મુક્તિમાપ્નુયાત્ ॥ ૨૪ ॥

યતસ્તત્પદવાચ્યોઽર્થઃ સ હેય ઇતિ કથ્યતે ।
અતસ્તસ્ય ન નિત્યત્વં નાકર્મત્વં ચ યુજ્યતે ॥ ૨૫ ॥

અનધ્યસ્તાત્મભાવેન ન દેહેનૈવ કશ્ચન ।
વ્યાપ્રીયેત તતશ્ચ સ્યાદ્દેહીશો ધ્યાનસંયુતઃ ॥ ૨૬ ॥

સ્વદેહેઽપીશ્વરસ્યાસ્તિ નાધ્યાસઃ પારમાર્થિકઃ ।
પ્રાતિભાસિકમાશ્રિત્ય સ્રષ્ટૃત્વાદિ નિગદ્યતે ॥ ૨૭ ॥

દેહાધ્યાસસ્ય સત્યસ્ય ન કદાપ્યસ્તિ સંગતિઃ ।
પ્રાગીશદેહાભાવેન દેહાભાવેન ચાઽપ્યયે ॥ ૨૮ ॥

જગત્પ્રલયકાલે સ નિર્વ્યાપારોઽપિ સુપ્તવત્ ।
અધ્યાસબીજવત્ત્વેન પુનઃ સૃષ્ટૌ પ્રવર્તતે ॥ ૨૯ ॥

ચતુર્યુગસહસ્રાન્તે વિધાતુર્હિ નિશોચ્યતે ।
તદા સુપ્તસ્ય તસ્યાપિ જીવસ્યેવ સબીજતા ॥ ૩૦ ॥

તથા વિષ્ણોર્યુગાઃ પ્રોક્તાસ્તસ્માચ્છતગુણાધિકાઃ ।
તથા શિવસ્ય તસ્માચ્ચ વિષ્ણોઃ શતગુણાધિકાઃ ॥ ૩૧ ॥

એવં કાલૈરવચ્છિન્નાંસ્તારતમ્યેન જીવવત્ ।
ઈશ્વરાંસ્તાન્ કથં બ્રૂયાં દેહકર્માદિવર્જિતાન્ ॥ ૩૨ ॥

વ્યષ્ટિદેહત્રયં સ્વીયં મત્વા જીવત્રયં યથા ।
પારમાર્થિકસંસારનિબદ્ધં કર્મિતામગાત્ ॥ ૩૩ ॥

સમષ્ટિદેહત્રિતયં તથા મત્વેશ્વરત્રયમ્ ।
પ્રાતિભાસિકસંસારનિબદ્ધં કર્મિતામગાત્ ॥ ૩૪ ॥

શુદ્ધસત્ત્વપ્રધાનાયાં માયાયાં પ્રતિબિમ્બિતઃ ।
ઈશ ઇત્યુચ્યતે તસ્ય નિરુપાધિકતા કથમ્ ॥ ૩૫ ॥

ઔપાધિકસ્ય નિત્યત્વં કથં વાચ્યં મનીષિભિઃ ।
અનિત્યસ્ય ચ નૈષ્કર્મ્યં કથં ભવિતુમર્હતિ ॥ ૩૬ ॥

બ્રહ્મણ્યારોપિતો ભ્રાન્તૈરીશાખ્યઃ સર્વસૃષ્ટિકૃત્ ।
આત્મયોગિભિરભ્રાન્તૈઃ સ ભવત્યવરોપિતઃ ॥ ૩૭ ॥

અવિદ્યાતિમિરાન્ધસ્ય સ્થાણૌ ચોરવદીશ્વરઃ ।
પ્રતિભાતિ પરબ્રહ્મણ્યમલે સ્વાત્મરૂપિણિ ॥ ૩૮ ॥

સદ્યો મુમુક્ષુદૃષ્ટ્યા હિ નેશ્વરસ્યાસ્તિ સત્યતા ।
અતો વિવર્તવાદોઽયં સુતરામુપયુજ્યતે ॥ ૩૯ ॥

પરિણામેઽપ્યનિત્યત્વસંસિદ્ધેરીશ્વરસ્ય ચ ।
અદ્વૈતબ્રહ્મનિષ્ઠત્વં શ્રોતુર્જીવસ્ય સમ્ભવેત્ ॥ ૪૦ ॥

અધિકારિવિભેદેન વાદાસ્તે મતાત્રયઃ ।
તત્રોત્તમાધિકારી સ્યાચ્છૃણ્વન્નીશે વિવર્તતામ્ ॥ ૪૧ ॥

જીવે તુ પરિણામિત્વં શ‍ૃણ્વન્નેવોત્તમોત્તમઃ ।
કીટવદ્ભૃઙ્ગરૂપેણ પરિણામે વિમોક્ષતઃ ॥ ૪૨ ॥

જીવસ્યેશ્વરતાઽવાપ્તૌ ક્રમમુક્તિર્હિ સિધ્યતિ ।
અતોઽસ્ય સદ્યો મુક્ત્યર્થં બ્રહ્મતાવાપ્તિરીર્યતે ॥ ૪૩ ॥

તુરીયઃ પંચમો વાઽઽસ્તામીશ્વરઃ ષષ્ઠ એવ વા ।
તસ્માદતીતં બ્રહ્મેતિ સિદ્ધાન્તે કોઽનુસંશયઃ ॥ ૪૪ ॥

ઈશ્વરે તિષ્ઠતિ બ્રહ્મ બ્રહ્મણીશશ્ચ તિષ્ઠતિ ।
અત એકત્વમેવ સ્યાદ્દ્વયોરિતિ ન તર્ક્યતામ્ ॥ ૪૫ ॥

બ્રહ્મણ્યેવેશ્વરઃ પ્રોક્તો ન તુ બ્રહ્મેશ્વરે ક્વચિત્ ।
વિભોરવિભુસંસ્થત્વાસંભવાત્પરમાત્મનઃ ॥ ૪૬ ॥

બ્રહ્મક્ષત્રમુભે યસ્ય શ્રુત્યા ભવત ઓદનઃ ।
યસ્યોપસેચનં મૃત્યુઃ સ યત્ર બ્રહ્મણીર્યતે ॥ ૪૭ ॥

તદેતાદૃશમિત્યત્ર કો વેદેદન્તયાવ્યયમ્ ।
અખણ્ડં નિર્ગુણં બ્રહ્મ નિરાધારં પરં મહત્ ॥ ૪૮ ॥

પરબ્રહ્માંશભૂતોઽપિ પરમઃ પુરુષોત્તમઃ ।
ઈશ્વરાદધિકઃ પ્રોક્તઃ કિં પુનર્બ્રહ્મ કેવલમ્ ॥ ૪૯ ॥

કારણં જગતામીશો જીવાનાં બ્રહ્મ કારણમ્ ।
એવં સતીશબ્રહ્મૈક્યં વ્યવહારે કથં ભવેત્ ॥ ૫૦ ॥

ઈશસ્ય કર્મિતાયાં હિ પુણ્યં પાપં ચ સંભવેત્ ।
સુખં દુઃખં ચ તેનૈવ જીવત્વમિતિ ચેચ્છૃણુ ॥ ૫૧ ॥

ઈશઃ પ્રવર્તતે પુણ્યપાપયોર્લોકસંગ્રહાત્ ।

તથાઽપિ સુખદુઃખે સ્તો નૈવાત્મજ્ઞાનવત્તયા ॥ ૫૨ ॥

ભ્રૂણહત્યાદિપાપાનિ હ્યકરોદ્વિષ્ણુરીદૃશઃ ।
ન તૈર્દુઃખમભૂત્તસ્ય સમ્પ્રાપ્તં પારમાર્થિકમ્ ॥ ૫૩ ॥

લોકક્ષેમાર્થકત્વેન તત્કૃતાઘસ્ય નિન્દ્યતા ।
ન વાચ્યા ન ચ તેનાસ્તિ જીવત્વં તસ્ય સર્વથા ॥ ૫૪ ॥

ઋગાદિવેદકર્તાઽપિ સ યથોક્તં સમાચરેત્ ।
અન્યથા સમ્પ્રસજ્યેત હ્યપ્રામાણિકતેશિતુઃ ॥ ૫૫ ॥

સંસિદ્ધે શાસ્ત્રકર્તૃત્વે ન કારયિતૃતા વચઃ ।
વ્યર્થમેવેતિ ચેન્નૈષ દોષ એવ વિચારણે ॥ ૫૬ ॥

જીવસ્ય કર્તૃતાયાં હિ સ્યાત્કારયિતૃતેશિતુઃ ।
શાસ્ત્રસ્ય કર્મતાયાં તુ મહેશસ્યાસ્તિ કર્તૃતા ॥ ૫૭ ॥

નૈતેન શાસ્ત્રયોનિત્વં નિર્ગુણસ્યૈવ હીયતે ।
નિર્ગુણોદ્ભૂતશાસ્ત્રસ્ય સગુણાદ્વ્યક્તિદર્શનાત્ ॥ ૫૮ ॥

ઉપચર્યત ઈશસ્ય ગુણિનઃ શાસ્ત્રયોનિતા ।
યદ્વાઽસ્તામુભયોર્વેદવેદાન્તાભ્યાં ચ બીજતા ॥ ૫૯ ॥

ન ચૈતેનાસ્તિ કર્મિત્વસામ્યં બ્રહ્મેશયોસ્તયોઃ ।
કર્તુશ્ચ કૃતકર્તુશ્ચ ભેદોઽસ્તિ સ્પષ્ટ એવ હિ ॥ ૬૦ ॥

કર્તૃત્વં યસ્ય સંસિદ્ધં કર્મિત્વં તસ્ય સિદ્ધ્યતિ ।
ઇત્યત્ર સંશયઃ કો વા તદ્બ્રહ્મેશૌ ચ કર્મિણૌ ॥ ૬૧ ॥

ઇતિ ચેત્કર્મિતેશસ્ય કામિત્વાદિવદિષ્યતે ।
બ્રહ્મણોઽપિ તુ કર્મિત્વં ધનિત્વાદિવદિત્યતઃ ॥ ૬૨ ॥

પરતન્ત્રો મહેશઃ સ્યાત્સ્વતન્ત્રં બ્રહ્મ નિર્ગુણમ્ ।
આધારાધેયભાવેન કાર્યકારણતયા દ્વયોઃ ॥ ૬૩ ॥

કર્મિત્વે બ્રહ્મણઃ સિદ્ધે કથં નૈર્ગુણ્યમીર્યતે ।
ઇતિ ચેન્નૈષ દોષોઽસ્તિ માયાગુણવિવર્જનાત્ ॥ ૬૪ ॥

અદૃશ્યાદિભિર્વિદ્યાગુણૈરાનન્દતાદિભિઃ ।
સગુણવ્યપદેશઃ સ્યાદ્બ્રહ્મણસ્ત્વિષ્ટ એવ સઃ ॥ ૬૫ ॥

જગત્સંસારકર્તૃત્વં યથા જીવેશયોર્મતમ્ ।
તથા જીવેશકર્તૃત્વં પરસ્ય બ્રહ્મણો મતમ્ ॥ ૬૬ ॥

બ્રહ્મણોઽન્યો ન કર્તાઽસ્તિ પ્રાક્કર્માદિવિવર્જનાત્ ।
અનાદ્યનન્તં બ્રહ્મૈકમકર્માકર્તૃ હીર્યતે ॥ ૬૭ ॥

કાલત્રયેઽપ્યકર્તૃત્વં બ્રહ્મણઃ સમ્મતં યદિ ।
જીવેશરચના ન સ્યાત્ જગત્સંસારયોરપિ ॥ ૬૮ ॥

પ્રત્યક્ષસિદ્ધા રચના કર્તારં સમપેક્ષતે ।
અતોઽદ્ય કર્મકર્તૃત્વાદ્બ્રહ્મણઃ કર્મિતોચિતા ॥ ૬૯ ॥

કર્મિત્વે બ્રહ્મણોઽપ્યેવં કિં વાચ્યં બ્રહ્મવેદિનઃ ।
બ્રહ્મીભૂતો ન કર્મી સ્યાદિત્યેતચ્ચ ન સિદ્ધ્યતિ ॥ ૭૦ ॥

યાદૃશં બ્રહ્મ નિર્ણીતં તદ્ભૂતોઽપિ ચ તાદૃશઃ ।
ઇતિ નિર્ણય એવ સ્યાદ્યુક્તેરપિ સમંજસઃ ॥ ૭૧ ॥

કાલત્રયેઽપ્યકર્મિત્વમકર્તૃત્વમકાલતા ।
કસ્ય ચિદ્બ્રહ્મણોઽન્યસ્ય નીરૂપસ્યાસ્તિ વસ્તુનઃ ॥ ૭૨ ॥

તત્ર કાલત્રયાતીતં નેહ જ્ઞેયં વિવક્ષિતમ્ ।
પ્રમેયત્વપ્રમાણત્વપ્રમાતૃત્વાદિવર્જનાત્ ॥ ૭૩ ॥

યે તુ બ્રહ્મેશજીવાઃ સમ્પ્રોક્તાઃ કર્તૃત્વસંયુતાઃ ।
વિદ્યયા માયયા તે હિ કર્મિણોઽવિદ્યયાપિ ચ ॥ ૭૪ ॥

કર્મિષુ ત્રિષુ ચોક્તેષુ બ્રહ્મણઃ શ્રૈષ્ઠ્યદર્શનાત્ ।
અકર્મત્વં શ્રુતિસ્મૃત્યોઃ પ્રોચ્યતે યુક્તમેવ તત્ ॥ ૭૫ ॥

એતેન કર્મિણઃ શ્રૈષ્ઠ્યં સંસિદ્ધમિતિ યે વિદુઃ ।
ઔદાસીન્યં ન તેષાં સ્યાચ્છ્રુતિસ્મૃત્યુક્તકર્મસુ ॥ ૭૬ ॥

જ્ઞાનાદુપાસ્તિરુત્કૃષ્ટા કર્મોત્કૃષ્ટમુપાસનાત્ ।
ઇતિ યો વેદ વેદાન્તૈઃ સ એવ પુરુષોત્તમઃ ॥ ૭૭ ॥

ઇતિ સૂર્યગીતાયાં ચતુર્થોઽધ્યાયઃ ॥ ૪ ॥

અથ પઞ્ચમોઽધ્યાયઃ ॥

સૂર્ય ઉવાચ -

અથાતઃ સમ્પ્રવક્ષ્યામિ કર્મિશ્રેષ્ઠસ્ય લક્ષણમ્ ।
યચ્છ્રુત્વા નૈવ ભૂયોઽન્યચ્છ્રોતવ્યં તેઽવશિષ્યતે ॥ ૧ ॥

યસ્ય દેહઃ સ્વકીયોઽપિ સર્વથા ન પ્રતીયતે ।
નેન્દ્રિયાણિ ચ સર્વાણિ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૨ ॥

યસ્ય પ્રાણાઃ પ્રશાન્તાઃ સ્યુર્મન આદીનિ ચ સ્વયમ્ ।
અવ્યક્તાન્તાનિ સર્વાણિ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૩ ॥

બાલોન્મત્તપિશાચાદિ ચેષ્ટિતાન્યપિ યત્ર નો ।
નિષ્ઠાઽજગરવદ્યસ્ય સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૪ ॥

નાહંભાવશ્ચ યસ્યાસ્તિ નેદંભાવશ્ચ કુત્રચિત્ ।
સર્વદ્વન્દ્વવિહીનાત્મા સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૫ ॥

પ્રાગ્બદ્ધોઽહં વિમુક્તોઽદ્યેત્યેવં યસ્ય સ્મૃતિર્ન ચ ।
નિત્યમુક્તસ્વરૂપઃ સન્ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૬ ॥

વિદેહમુક્તો યઃ પ્રોક્તો વરિષ્ઠો બ્રહ્મવેદિનામ્ ।
અરૂપનષ્ટચિત્તાસુઃ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૭ ॥

કર્માણિ યસ્ય સર્વાણિ વાસનાત્રયજાનિ ચ ।
અભવન્નુપશાન્તાનિ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૮ ॥

કર્માણિ કર્મભિઃ શુદ્ધૈરશુદ્ધાન્યુપમૃદ્ય યઃ ।
સ કર્મબ્રહ્મમાત્રોઽભૂત્ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૯ ॥

જ્ઞાનિનામપિ યઃ શ્રેષ્ઠઃ સપ્તમીં ભૂમિકાં ગતઃ ।
ઉપાસકાનાં યશ્ચૈકઃ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૧૦ ॥

યઃ સર્વૈઃ પીડિતોઽપિ સ્યાન્નિર્વિકારોઽપિ પૂજિતઃ ।
સુખદુઃખે ન યસ્ય સ્તઃ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૧૧ ॥

યઃ સર્વૈર્મનુજૈઃ પૂજ્યો યઃ સર્વૈશ્ચ સુરાસુરૈઃ ।
બ્રહ્મવિષ્ણુશિવૈર્યશ્ચ સ કર્મિશ્રેષ્ઠ ઉચ્યતે ॥ ૧૨ ॥

ત્યક્ત્વા કર્માણિ સર્વાણિ સ્વાત્મમાત્રેણ તિષ્ઠતઃ ।
કથં કર્મિત્વમિત્યેવં મા શંકિષ્ઠા મહામતે ॥ ૧૩ ॥

કર્મણાં ફલમેષા હિ સ્વાત્મમાત્રેણ સંસ્થિતિઃ ।
અતઃ સફલકર્મૈષ કર્મિશ્રેષ્ઠો ભવેદ્ધ્રુવમ્ ॥ ૧૪ ॥

જ્ઞાનેન જ્ઞાયતે યદ્વા ઉપાસ્ત્યા ચોપલભ્યતે ।
તત્સ્થિરં પ્રાપ્યતેઽનેન કર્મણા।આતોઽસ્ય કર્મિતા ॥ ૧૫ ॥

દેહેઽસ્મિન્ વર્તમાનેઽપિ દેહસ્મૃતિવિવર્જનાત્ ।
વિદેહમુક્ત ઇત્યુક્તઃ કથં કર્મીતિ ચેચ્છૃણુ ॥ ૧૬ ॥

દેહવિસ્મૃતિમત્ત્વેઽપિ કર્મદેહે સ્થિતત્વતઃ ।
અન્યદૃષ્ટ્યાઽસ્ય દેહિત્વાત્કર્મિત્વમુપપદ્યતે ॥ ૧૭ ॥

દેહસ્થત્વાદપૂર્ણઃ સ્યાદિતિ શક્યં ન કિંચન ।
તટાકમપ્રકુંભસ્થં જલં પૂર્ણં હિ દૃશ્યતે ॥ ૧૮ ॥

પ્રારબ્ધકર્મમુક્તોઽપિ ભોગાન્મુક્તોઽપિ ચાખિલાત્ ।
કર્માકાર્યે સ્થિતઃ કર્મી દેહે સ્યાદ્ભોગસાધને ॥ ૧૯ ॥

સાધને સતિ દેહેઽપિ સાધ્યો ભોગો ન સિધ્યતિ ।
દેહવિસ્મૃતિમત્ત્વેન દેહહીનસમત્વતઃ ॥ ૨૦ ॥

આહિતાગ્નિત્વસંસિદ્ધ્યૈ જ્યોતિષ્ટોમે કૃતેઽપિ ચ ।
યથા ન સ્વર્ગમાપ્નોતિ નિષ્કામઃ પુરુષર્ષભઃ ॥ ૨૧ ॥

જાગ્રસ્વપ્નસુષુપ્ત્યાત્મસન્ધિત્રયકૃતામૃતઃ ।
સર્વસન્ધ્યાદિરહિતઃ સન્ધિભિર્વન્દ્યતે સદા ॥ ૨૨ ॥

યઃ સર્વકર્મભિર્વન્દ્યો નિત્યં સર્વૈરકર્મિભિઃ ।
સ કર્મિપ્રવરોઽકર્મિપ્રવરશ્ચેતિ કથ્યતે ॥ ૨૩ ॥

સર્વસામ્યમુપેત્યસ્ય સ્વાત્મારામસ્ય યોગિનઃ ।
સહસ્રશઃ કૃતૈઃ કિં વા વન્દનૈરકૃતૈશ્ચ વા ॥ ૨૪ ॥

દેહાદિષુ વિકારેષુ સ્વીયત્વં સ્વત્વપૂર્વકમ્ ।
વિહાય નિત્યનિષ્ઠાભિઃ સ્વમાત્રઃ સ વિરાજતે ॥ ૨૫ ॥

ઇન્દ્રિયાર્થૈર્વિમૂઢાનાં દુષ્કર્મત્વં નિગદ્યતે ।
તૈરપેતઃ સુકર્મ્યેષ વિદેહ ઇતિ કથ્યતે ॥ ૨૬ ॥

યઃ સર્વદ્વન્દ્વનિર્મુક્તઃ સર્વત્રિપુટિવર્જિતઃ ।
સર્વાવસ્થાવિહીનઃ સ વિદેહ ઇતિ કથ્યતે ॥ ૨૭ ॥

લૌકિકં વૈદિકં કર્મ સર્વં યસ્મિન્ક્ષયં ગતમ્ ।

યસ્માન્નૈવાણુમાત્રં ચ વિદેહ ઇતિ કથ્યતે ॥ ૨૮ ॥

યસ્યેન્દ્રિયાણિ સર્વાણિ ન ચલન્તિ કદાચન ।
ભિત્તિસ્થચિત્રાંગાનીવ વિદેહ ઇતિ કથ્યતે ॥ ૨૯ ॥

આત્માનં સત્યમદ્વૈતં કેવલં નિર્ગુણામૃતમ્ ।
સમ્પશ્યતઃ સદા સ્વાન્યવિકારસ્ફુરણં કુતઃ ॥ ૩૦ ॥

આત્મેતરદસત્યં ચ દ્વૈતં નાનાગુણાન્વિતમ્ ।
અપશ્યતઃ સદાનન્દસ્વરૂપાસ્ફુરણં કુતઃ ॥ ૩૧ ॥

આદિમધ્યાન્તરહિતચિદાનન્દસ્વરૂપિણઃ ।
સ્થિતપ્રજ્ઞસ્ય કો બાધઃ શરીરેણ સ્વયોગિનઃ ॥ ૩૨ ॥

કર્માણિ કર્મણા ત્યક્ત્વા બ્રહ્મણા બ્રહ્મણિ સ્થિતઃ ।
કર્મણા શર્મ સતતં સમ્પ્રાપ્તઃ સ વિરાજતે ॥ ૩૩ ॥

બુદ્ધેસ્તૈક્ષ્ણ્યં ચ મૌઢ્યં ચ યસ્ય નૈવાસ્તિ કિંચન ।
બુદ્ધેઃ પારંગતઃ સોઽયં પ્રબુદ્ધઃ શોભતેતરામ્ ॥ ૩૪ ॥

મનસ્તથૈવ સંલીનં ચિતીવ લવણં જલે ।
યથા નિરન્તરાત્મીયનિષ્ઠયા સોઽદ્વયોઽભવત્ ॥ ૩૫ ॥

સમનસ્ત્વાન્મહદ્દુઃખમમનસ્કસ્ય તત્કુતઃ ।
સમનસ્કો હિ સંકલ્પાન્ કરુતે દુઃખકારિણઃ ॥ ૩૬ ॥

પ્રારબ્ધકર્મજં દુઃખં જીવન્મુક્તસ્ય કથ્યતે ।
કર્મત્રયવિહીનસ્ય વિદેહસ્ય કથં નુ તત્ ॥ ૩૭ ॥

કર્મ કર્તવ્યમિતિ વા ન કર્તવ્યમિતીહ વા ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૩૮ ॥

સમાધિર્વાઽથ કર્તવ્યો ન કર્તવ્ય ઇતીહ વા ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૩૯ ॥

પૂર્વં બદ્ધોઽધુના મુક્તોઽસ્મ્યહમિત્યેવ બન્ધનાત્ ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૪૦ ॥

પૂર્વમપ્યભવન્મુક્તો મધ્યે ભ્રાન્તિસ્તુ બન્ધવત્ ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૪૧ ॥

વન્ધ્યાપુત્રાદિવત્સર્વં મય્યભૂદસદિત્યપિ ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૪૨ ॥

આવિદ્યકં તમો ધ્વસ્તં સ્વપ્રકાશેન વા ઇતિ ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૪૩ ॥

સ્વપ્નેઽપિ નાહંભાવોઽસ્તિ મમ દેહેન્દ્રિયાદિષુ ।
યદિ મન્યેત વૈદેહીં ન મુક્તિં પ્રાપ્તવાંસ્તુ સઃ ॥ ૪૪ ॥

અરૂપનષ્ટમનસો વિદેહત્વં પ્રકીર્ત્યતે ।
તત્કથં મન્યમાનસ્ય યત્કિંચિત્સ્યાદનાત્મનઃ ॥ ૪૫ ॥

મનો નશ્યતિ નિઃશેષં મનનસ્ય વિસર્જનાત્ ।
અમનસ્કસ્વભાવં તત્પદં તસ્યાવશિષ્યતે ॥ ૪૬ ॥

મનનેન વિનિશ્ચિત્ય વૈદેહીં મુક્તિમાત્મનઃ ।
નૈષ્કર્મ્યસિદ્ધિં વદતાં કા તૃપ્તિરવિવેકિનામ્ ॥ ૪૭ ॥

શ્રુત્વા વેદાન્તવાક્યાનિ મોદન્તેઽનુભવં વિના ।
લીઢેન તાડપત્રેણ ગુડાક્ષરયુતેન કિમ્ ॥ ૪૮ ॥

સ્વાનુભૂતિં વિના શાસ્ત્રૈઃ પણ્ડિતાઃ સમલંકૃતાઃ ।
કચહીનેવ વિધવા ભૂષણૈર્ભૂષિતોત્તમૈઃ ॥ ૪૯ ॥

સ્વાનુભૂતિં વિના કર્માણ્યાચરન્ત્યખિલાન્યપિ ।
સ્વર્ણાયઃકુમ્ભકારાદિતુલ્યા એવોપવીતિનઃ ॥ ૫૦ ॥

સ્વાનુભૂતિં વિના વેદાન્ પઠન્તિ વિવિધા દ્વિજાઃ ।
પ્રાવૃણ્ણિશાયાં પરિતો મણ્ડૂકા ઇવ દુસ્સ્વરાઃ ॥ ૫૧ ॥

સ્વાનુભૂતિં વિના દેહં બિભ્રત્યધ્યાસદાર્ઢ્યતઃ ।
શાકલ્યસ્ય મૃતં દેહં ધનબુદ્ધ્યેવ તસ્કરાઃ ॥ ૫૨ ॥

સ્વાનુભૂતિં વિના ધ્યાનં કુર્વન્ત્યાસનસંયુતાઃ ।
બકા ઇવાંભસસ્તીરે મત્સ્યવંચનતત્પરાઃ ॥ ૫૩ ॥

સ્વાનુભૂતિં વિના શ્વાસાન્નિરુન્ધન્તિ હઠાત્સદા ।
અયસ્કારોઽનિલં બાહ્યં દ્રુતિકાયામિવાધિકમ્ ॥ ૫૪ ॥

સ્વાનુભૂતિં વિના યોગદણ્ડપટ્ટાદિધારિણઃ ।
જીર્ણકન્ધાભરં ભગ્નદણ્ડભાણ્ડાદિ પિત્તવત્ ॥ ૫૫ ॥

સ્વાનુભૂતિં વિના યદ્યત્કુર્વન્તિ ભુવિ માનવાઃ ।
તત્તત્સર્વં વૃથૈવ સ્યાન્મરુભૂમૌ કૃષિર્યથા ॥ ૫૬ ॥

સ્વાનુભૂત્યર્થકં કર્મ નિકૃષ્ટમપિ સર્વથા ।
ઉત્તમં વિબુધૈઃ શ્લાઘ્યં શ્લેવ ચોરનિવર્તકઃ ॥ ૫૭ ॥

સ્વાનુભૂત્યુપયુક્તેભ્ય ઇતરાણિ બહૂન્યપિ ।
કર્માદીન્યાચરન્મર્ત્યો ભ્રાન્તવદ્વ્યર્થચેષ્ટિતઃ ॥ ૫૮ ॥

શ્રુતિસ્મૃતિપુરાણેષુ કામ્યકર્માણ્યનેકધા ।
પ્રોચ્યન્તે તેષુ સંસક્તસ્ત્યાજ્યઃ શિષ્ટૈર્વિટો યથા ॥ ૫૯ ॥

કામ્યકર્મસમાસક્તઃ સ્વનિષ્ઠાં સ્વસ્ય મન્યતે ।
જાત્યન્ધઃ સ્વસ્ય રત્નાદિપરીક્ષાદક્ષતામિવ ॥ ૬૦ ॥

અવશેન્દ્રિયમાત્માર્થગુરુબુદ્ધ્યૈવ સેવતે ।
બાલાતન્તુસુતં લોકેઽગણિતં ભુક્તયે યથા ॥ ૬૧ ॥

યસ્તુ વશ્યેન્દ્રિયં શાન્તં નિષ્કામં સદ્ગુરું સદા ।
સ્વાત્મૈકરસિકં મુક્ત્યૈ સ ધીમાનુપગચ્છતિ ॥ ૬૨ ॥

કામ્યકર્માણિ ચોત્સૃજ્ય નિષ્કામો યો મુમુક્ષયા ।
શાન્ત્યાદિગુણસંયુક્તં ગુરું પ્રાપ્તઃ સ મુચ્યતે ॥ ૬૩ ॥

ઇતિ શ્રુત્વાઽરુણઃ સૂર્યાત્સંતુષ્ટઃ સ્વાત્મનિષ્ઠયા ।
કૃતકૃત્ય ઇદં પ્રાહ ભાસ્કરં વિનયાન્વિતઃ ॥ ૬૪ ॥

અરુણ ઉવાચ -
શ્રીમન્ગુરુવર સ્વામિંસ્ત્વન્મુખાત્પારમાર્થિકમ્ ।
નિષ્કામકર્મમાહાત્મ્યં શ્રુત્વા ધન્યોઽસ્મ્યસંશયમ્ ॥ ૬૫ ॥

સકર્મત્વમકર્મત્વં વિદેહસ્ય ચ લક્ષણમ્ ।
શ્રુતં રહસ્યં નાતોઽન્યત્કિંચિદપ્યવશિષ્યતે ॥ ૬૬ ॥

તથાઽપિ મમ સાક્ષાત્ત્વં કર્તવ્યં બ્રૂહિ નિશ્ચિતમ્ ।
મચ્ચિત્તપરિપાકં હિ વેત્સિ સર્વજ્ઞ સદ્ગુરો ॥ ૬૭ ॥

ઇતિ પૃષ્ટ ઉવાચેદં ભગવાન્ભાસ્કરોઽરુણમ્ ।
સ્વસારથિં નિજગ્રસ્થં બદ્ધબાહું નતાનનમ્ ॥ ૬૮ ॥

સૂર્ય ઉવાચ -
અરુણ ત્વં પરં બ્રહ્મ સાક્ષાદ્દૃષ્ટ્વાઽધુના કૃતી ।
તથાઽપ્યાદેહપતનાદ્બ્રહ્માભિધ્યાનમાદરાત્ ॥ ૬૯ ॥

સ્વાધિકારોચિતં શુદ્ધં કર્માણ્યાચર સત્તમ ।
પ્રમાદો માઽસ્તુ તે સ્વપ્નેઽપ્યુક્તયોર્બ્રહ્મકર્મણોઃ ॥ ૭૦ ॥

સંવાદમાવયોરેતં સર્વપાપહરં શુભમ્ ।
યઃ શ઼ૃણોતિ સકૃદ્વા સ કૃતાર્થો નાત્ર સંશયઃ ॥ ૭૧ ॥

શ્રીગુરુમૂર્તિરુવાચ -
ઇતિ દિનકરવક્ત્રાદ્બ્રહ્મકર્મૈનિષ્ઠાં
સ્ફુટતરમવગમ્ય પ્રાજ્ઞ એકોઽરુણઃ સઃ ।
અભવદખિલલોકૈઃ પૂજનીયઃ કૃતાર્થ-
સ્ત્વમપિ ભવ તથૈવ ક્ષિપ્રમંભોજજન્મન્ ॥ ૭૨ ॥

વિમલવિગુણયોગાભ્યાસદાર્ઢ્યેન યુક્તઃ
સકલગતચિદાત્મન્યદ્વિતીયે બુધોઽપિ ।
સતતમપિ કુરુષ્વારબ્ધદુઃખોપશાન્ત્યૈ
રહસિ નિજસમાધીન્સ્વોક્તકર્માપિ ધાતઃ ॥ ૭૩ ॥

ઇતિ તત્ત્વસારાયણકર્મકાણ્ડોક્તશ્રીસૂર્યગીતાયાં પંચમોઽધ્યાયઃ ॥

॥ ઇતિ સૂર્યગીતા સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*SUrya Gita*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*